# ज्योतिषशास्त्रे नक्षत्राधारेण नेत्ररोगविचारः[१]

**रघुनन्दन शर्मा**
शोधछात्र
ज.रा.रा.सं.वि.वि., जयपुर

रोगज्ञानाय यथा ग्रहाणांराशीणां च भूमिका महत्त्वपूर्णं भवति तथैव नक्षत्राणामपि भूमिका विशिष्टा मन्यते। रोगविशेषाणां कारकाःनक्षत्रविशेषाः अपि ज्योतिषशास्त्रे प्रतिपादिताः सन्ति। कदा चैषां प्रभावो भवति इति सर्वैश्चिन्तितं वर्तते। तदनुसारमत्र नेत्ररोगकारकनक्षत्राणां विषयः प्रस्तूयते-

1. **कृत्तिकानक्षत्रम्** – नेत्ररोगकारकेषु नक्षत्रेष्विदं मुख्यं नक्षत्रमस्ति। यदिसूर्यः चन्द्रमा द्वितीयेशः द्वादशेशो वा जन्मकालो पीडितावस्थायामस्मिन्नक्षत्रे गोचरीयं भ्रमणं कुर्वाणो भवेत् तदा नेत्ररोगस्य पूर्णसम्भावना विज्ञायते।

इदं नक्षत्रं रविभौमशुक्रशनिवासरेषु विशिष्टमशुभप्रभावकरं भवति। अतएव यदि एषुवारेषु कस्यचित्संयोगः स्यात् तदा नेत्ररोगघातको भवति।

2. मृगशिरा नक्षत्रम् - इदमपि नक्षत्रं सामान्यतया नेत्ररोगकारकमभिहितम्। यदा नेत्रस्थानगतमिदं नक्षत्रं पीडितं भवति तदाऽवश्यं नेत्ररोगः सम्भाव्यते। केषांचन मतानुसारं षष्ठेऽष्टमे वा इदं नक्षत्रं पीडितं भवति, तदापि नेत्ररोगसम्भावना विज्ञातव्या भीवति।

इदं नक्षत्रं सोमवारं विहायान्यवारेषु अनिष्टकरो मन्यते। अतएव सोमवासरश्चेत् सामान्यो रोगः अन्यवासरश्चेदसामान्यरोगः सम्भाव्यते।

केचित् अस्मिन् नक्षत्रे क्षीणचन्द्रस्य स्थितिः, द्वितीये षष्ठे अष्टमे द्वादशे वा भवेत्, तदाऽवेश्यं नेत्ररोगः स्यादिति प्रतिपादयन्ति।

3. **पुनर्वसुनक्षत्रम्** – इदमपि नक्षत्रं नेत्ररोगकारकेषु नक्षत्रेषु परिगणितमस्ति। यदि नेत्रकारको ग्रहः अस्मिन्नक्षत्रे पीडितावस्यायां भवति षष्ठे एकादशे वा संस्थितो भवति तदा नेत्ररोगः सम्भाव्यते।

इदं नक्षत्रं शुक्रवासरे विशेषमशुभप्रभावकरं भवति। अतएव शुक्रवारस्य संयोगश्चेन्नेत्ररोगस्य

घातकत्वमनुमीयते।

4. पूर्वाफाल्गुनीनक्षत्रम् - इदमपि नक्षत्रं नेत्ररोगकारकमभिमतमस्ति। यदि नेत्रस्थाने अस्य नक्षत्रस्य संस्थितिः पीडितावस्थायां भवेत् तदा नेत्ररोगः सम्भाव्यते। केचन द्वितीयेशे द्वादशेशे वा अस्मिन् नक्षत्रे विद्यमाने पीड़िते सति नेत्ररोगस्यावश्यम्भावितां प्रतिपादयन्ति।

इदं नक्षत्रं शुक्रवारं विहाय अन्यवारेषु विशेषेण अशुभप्रभावकरं मन्यते। एवं चेच्छुक्रवासरयोगे रोगस्य सामान्यत्वमन्यथ घातकत्वं विज्ञेयम्।

केचित्त्वत्र प्रवदन्ति यत् अस्य नक्षत्रस्य पापमध्यगतत्वात् क्रूरदृष्टत्वाच्च प्रथमं शिरोरोगस्ततो नेत्ररोगश्च सम्भाव्यते।

5. **अनुराधा** – इदमपि नक्षत्रं नेत्ररोगकारकमस्ति। यदि इदं नक्षत्रं नेत्रस्थानस्थराश्यन्तर्गतं भवेत् पीडितावस्थायां भवेत् आदि च षष्ठेऽष्टमे वा भावे संस्थितं भवेत् तदा अवश्यं नेत्ररोगं स्यात्।

इदं नक्षत्रं रवि-मंगल-शुक्रवासरेषु विशेषतोऽनिष्टफलं प्रददाति। एवं चेतरवारेषु सामान्यरोगस्थितिर्ज्ञेया। एषु वारेषु कस्मिंश्चिद्विद्यमाने रोगस्य हानिकरत्वं विज्ञातव्यम्।

6. **मूलम्** - इदं नक्षत्रमपि नेत्ररोगकारकनक्षत्रेषु प्रमुखं विशिष्टञ्चाभिमतम्। यदि इदं नक्षत्रं नेत्रस्थाने संस्थितं भवेत् अथवा नेत्रस्थानं पीडितं सत्पश्येत् तदा पापदृष्टत्वे सति नेत्ररोंगकारकं भवति।

केषांचन मतेऽस्मिन्नक्षत्रे सूर्यस्य गोचरीयभ्रमणं विद्यमानं स्यात् सूर्यश्च षष्ठेऽष्टमे वा भवे विद्यमानः स्यात् नेत्रस्थानं पापयुक्तं स्यात्तदाऽप्यवश्यं नेत्ररोंगकारकं भवति।

इदं नक्षत्रं सोम-गुरु-शनिवासरेष्वनिष्टफलप्रदं भवति। नेत्ररोगाय शनिवासरः विशेषेणानिष्टकरो भवति। क्षीणचन्द्रे विद्यमाने सोमवासरोऽपि अनिष्टकरो मन्यते।

7. **पूर्वाभाद्रपद्रः** - इदमपि नक्षत्रं कैश्चिन्नेत्ररोगकारकमुक्तम्। तेषां मतानुसारं यदि कर्कराशिगतश्चन्द्रोऽस्मादष्टमे भवति सूर्यश्च पीडितो भवति तदाऽवश्यं नेत्ररोगं सम्भावयति। केचनान्ये नेत्रस्थानगते नक्षत्रेऽस्मिन् भौमेन दृष्टे चन्दे हीनबले च विद्यमाने नेत्ररोगस्य सम्भावनां प्रतिपादयन्ति। इदं अक्षिशूलमुद्भावयतीति केचित्।

इदं नक्षत्रं रविासरेऽनिष्टकरो न भवति, अतएव रविवासरे जन्म चेन्नेत्ररोगः सामान्यो विज्ञेयः। अन्यथा तु विशेष एव।

## नेत्ररोगकारका नक्षत्रयोगाः

1. यदि जन्मनक्षत्राद् द्वाविंशतितमे (वैनाशके) अथवा षोडशे (सांघातिके) नक्षत्रे गोचरीयभ्रमणं कुर्वाणः सूर्यः षष्ठभावे एकादशे भावे वा विद्यमानः स्यात् तदा नेत्ररोगस्य सम्भावना पूर्णतया विज्ञातव्या।

2. यदि नेत्रस्थाने वैनाशिकं सांघातिकं वा नक्षत्रं संस्थितं स्यात् तच्च पीडितमपि स्यात्तदाऽपि नेत्ररोगस्य पूर्णसम्भावना विज्ञेया।

3. यदि नेत्रस्थाने वैनाशिकं सांघातिकं वान क्षत्रं पापमध्यगतं भवेत् तदापि नेत्ररोगस्य पूर्णसम्भावना परिलक्ष्यते।

4. यदि नेत्रस्थानेशः वैनाशिके अथवा सांघातिके नक्षत्रे गोचरीयभ्रमणं कुर्वाणः षष्ठे अथवा अष्टमे भावे विद्यमानो भवति, तदापि नेत्ररोगस्य प्रबला सम्भावना संजायते।

5. यदा रोहिणीनक्षत्रं षष्ठस्थम् अष्टमस्थं वा भवति, सूर्यश्चन्द्रो वा तृतीय अथवा एकादशे भवति, नेत्रस्थानं पापयुक्तं भवति तदापि नेत्ररोगोऽवश्यं भवति।

6. यदि रोहिणीनक्षत्रं वक्रीग्रहेण युतं सत् द्वितीये द्वादशे वा संस्थितं भवेत् तदाऽपि नेत्ररोगं सम्भावयति।

7. यदि नेत्रस्थानगतं नक्षत्रं ततः एकोनविंशतितामं नक्षत्रं चेत्युभे नक्षत्रे पीडिते स्यातां तदाऽपि नेत्ररोगः सम्भाव्यते।

## नक्षत्रवशान्नेत्ररोगचक्रम्

| जन्मसमयः | जन्मनक्षत्रम् | भावसंस्थितिः | ग्रहस्थितिः |
|---|---|---|---|
| दिवा | श्लेषा-प्रथमचरणम् | षष्ठे | सूर्यः |
| दिवा | उत्तराभाद्रपदः-प्रथमचरणम् | षष्ठे | चन्द्रः |
| दिवा | मूलःप्रथमचरणम् | अष्टमे | चन्द्रः |
| रात्रौ | भरणीचतुर्थचरणम् | षष्ठे | भौमः |
| रात्रो | उत्तराफाल्गुनीतृतीयचरणम् | एकादशे | भौमः |
| दिवा | श्रवणःद्वितीयचरणम् | द्वादशे | सूर्यः |
| रात्रो | स्वातिप्रथमचरणम् | तृतीये | सूर्यः |
| रात्रौ | मृगशिराचतुर्थचरणम् | अष्टमे | चन्द्रः |

उक्तचक्रे दर्शित जन्मकाल - जन्मनक्षत्र-भावस्थितिग्रहस्थितिश्चयुगपत्स्यात्तदा नेत्ररोग सम्भावना विशेषेण विज्ञातव्या।

नक्षत्रावस्थासन्दर्भिता नेत्ररोगयोगाः

1. यदि सूर्यः नेत्रपाणि-अवस्थाया भवेत् तदा जातकः नेत्ररोगेण पीडितो भवति।

2. यदि क्षीणचन्द्रःनेत्रपाणि-अवस्थायां विद्यमानो भवति, तदापि जातकः नेत्ररोगेण पीडां प्राप्नोति।

3. यदि कृष्णपक्षीयश्चन्द्रो गमनावस्थायां विद्यमानों भवति, तदापि जातकः नेत्ररोगेण पीडितो भवति।

4. यदि भौमः प्रकाशनावस्थायां विद्यामानो भवति, तदापि जातकःनेत्ररोगेण पीडितो भवति।

5. यदि भौमः आगमनावस्थायां विद्यामनो भवति, तदापि जातकः नेत्ररोगेण अवश्यं पीडां प्राप्नोति।

6. यदि बुधः निद्रावस्थायां शयनावस्थायां वा विद्यमानो भवति, तदापि जातकः नेत्ररोगग्रस्तो भवति।

7. यदि गुरुः भोजनावस्थायां नेत्रस्थाना स्थितो भवति, तदापि जातकाय नेत्ररोगान् सम्भावयति।

8. यदि शुक्रः नेत्रपाणि- अवस्थायां प्रथम-सप्तम-दशममावेषु भवेत् तदा जातकः नेत्रहीनतां प्राप्नोति।

9. यदि शनिः भोजनावस्थायां विद्यमानो भवति, तदापि जातकः नेत्ररोगग्रस्तो भवति।

10. यदि राहुः नेत्रपाण्यवस्थयां विद्यमानः स्यात्तदापि जातकः नेत्ररोगग्रस्तो भवति।

11. यदि राहुः गमनावस्थायां नेत्रस्थानस्थो भवति, तदापि जातकाय नेत्ररोगं सम्भावयति।

**नक्षत्रगोचरतोनेत्ररोगयोगाः**

1. जन्मकालिक सूर्यनक्षत्राद् द्वितीयं वधसंज्ञकं नक्षत्रं यदि द्वितीयभावस्थराशौ गोचरं कुर्यात् तदा स्पष्टरूपेण नेत्ररोगस्य सम्भावना विज्ञातव्या।

2. यदि नेत्रस्थानीयं नक्षत्रं जलनक्षत्रात् द्वाविंशात् सप्तविंशतितमं यावत्कनक्षत्रेषु स्यात् तस्मिन् सूर्यः गोचरं कुर्वाणः स्यात् तदाऽपि नेत्ररोगस्य सम्भावना विज्ञेया।

3. चन्द्रमा यस्मिन्नक्षत्रे गोचरं कुर्वाणो भवेत् तस्मात् जन्मनक्षत्रं सप्तदशं अष्टादशं एकोनविंशतितमं वा भवेत्

द्वितीये अथवा द्वादशे संस्थितं नक्षत्रं च चन्द्रस्य गोचरीयनक्षत्रेण विद्धं स्यात् तदापि नेत्ररोगस्य पूर्णसम्भावना संजायते।

4. जन्मनक्षत्रात् अष्टादशतः सप्तविंशतितमं यावत्कनक्षत्रगतो भौमो यदि गोचरे नेत्रस्थानस्थराशिं पश्येत् अथवा भौमस्य गोचरीयनक्षत्रेण नेत्रस्थानस्थनक्षत्रं विद्धं स्यात् तदापि नेत्ररोगस्य सम्भावना विशेषेणोपलक्ष्यते।

5. यदि जन्मकालिकबुधनक्षत्राज्जन्मनक्षत्रं विंशतितमं भवेत् तस्मिन्नक्षत्रे च यदापि बुधस्य गोचरीयं भ्रमणं स्यात् तदा नेत्ररोगस्य सम्भावना विज्ञातव्या।

6. जन्मनक्षत्रात् सप्तविंशतितमे नक्षत्रे गोचरीयं भ्रमणं कुर्वाणो बुधः यदा नेत्रस्थानं पश्यति, तदाऽपि नेत्ररोगस्य सम्भावना सामान्यतः संजायते।

7. जन्मकाले गुरोर्नक्षत्रान्नेत्रस्थानीयं नक्षत्रं चन्द्रनक्षत्रं च पञ्चदशादारभ्य विंशतितमपर्यन्तिकेषु विद्यमाने स्यातां तदा गुरोः तस्मिन्नक्षत्रे गोचरीयभ्रमणे कृते नेत्ररोगस्य सम्भावना स्पष्टं प्रतीयमाना भवति।

8. जन्मनक्षत्रात् त्रयोदशे चतुर्दशे पञ्चदशे षोडशे वा नक्षत्रे विद्यमानो गुरुः यदि गोचरीयभ्रमणवशात् नेत्रस्थानमायाति। नेत्रस्थानस्थनक्षत्रस्यापि वेधस्तदीयगोचरीयनक्षत्रेण भवति, तदा अवश्यं नेत्ररोगः सम्भवति।

9. यदि नेत्रस्थानीयं नक्षत्रं जन्मनक्षत्रात् अष्टादशं एकोनविंशतितमं वास्यात् तस्मिन् शुक्रः अधिष्ठितो भवेत् तर्हि शुक्रः तस्मिन्नेव नक्षत्रे गोचरीयभ्रमणं कुर्वाणो नेत्रपीडां नेत्रघातो वा सम्भावयति।

10. यदि नेत्रस्थानीयं नक्षत्रं शनेर्नक्षत्रात् तृतीयं भवेत् चन्द्रनक्षत्रंच द्वितीयं भवेत् तदा तस्मिन्नेव नक्षत्रे शनिः गोचरीयं भ्रमणं कुर्वाणो नेत्ररोगकारको भवति।

11. यदा शनेर्गोचरीयं भ्रमणं नेत्रस्थानीयनक्षत्रे भवेत् तदा जातकस्य चन्द्रः चतुर्थोऽष्टमो द्वादशो वा स्यात् सूर्यश्च षष्ठेऽष्टमेवा भवते भवेत् तदा ऽवश्यं नेत्ररोगोभवति।

12. गोचरीयशनिनक्षत्रात् जन्मनक्षत्रं यदि षड्विंशतितमं सप्तविंशतितमं वा स्यात् । तेन शनेर्गोचरीयनक्षत्रेण नेत्रस्थानीयं नक्षत्रं च विद्धं स्यात्तदापि नेत्ररोगस्य विशेषसम्भावना भवति।

13. गोचरीय राहुकेतुनक्षत्राज्जन्मनक्षत्रं यदि चतुर्विंशतितमं भवेत्। तदेव च नेत्रस्थानीयमपि स्यात् तदा तदीय गोचरीयभ्रमणकालावधौ नेत्ररोगः सम्भाव्यते।